## कणेमनसी श्रद्धाप्रतीघाते । (६६/७६७)

कणेशब्दो मनस्शब्दश्च श्रद्धाप्रतीघाते[1] गतिसञ्ज्ञौ भवतः[2] । कणेहत्य पयः पिबति । मनोहत्य पयः पिबति । तावत् पिबति यावदस्या[3]भिलाषो निवृत्तः । श्रद्धा [4]प्रतिहता इत्यर्थः । श्रद्धाप्रतीघाते इति किम् ? कणे हत्वा गतः । मनो हत्वा गतः ॥

## पुरोऽव्ययम् । (६७/७६८)

असिप्रत्ययान्तः पुरःशब्दो[5]ऽव्ययम् । स गतिसञ्ज्ञो भवति । समासस्वरोपचाराः (८.३.४०/१५४) प्रयोजनम् । पुरस्कृत्य । पुरस्कृतम् । यत्पुरस्करोति । अव्ययम् इति किम् ? पूः, पुरौ । पुरः कृत्वा [6]काण्डं गतः[7] ॥

## अस्तं च । (६८/७६९)

अस्तंशब्दो [8]मकारान्तोऽव्ययमनुपलब्धौ वर्तते । स गतिसञ्ज्ञो भवति । अस्तंगत्य सविता पुनरुदेति । अस्तंगतानि धनानि । [9]यदस्तंगच्छति । अव्ययम् इत्येव, [10]अस्तं काण्डम् । [11]क्षिप्तम् इत्यर्थः ॥

## अच्छ गत्यर्थवदेषु । (६९/७७०)

अच्छशब्दः अव्ययमभिशब्दस्यार्थे वर्तते । स गत्यर्थेषु धातुषु वदतौ [12]च गतिसञ्ज्ञो भवति । अच्छगत्य । [13]अच्छगतम् । [14]यदच्छगच्छति । वदतौ–अच्छोद्य । अच्छोदितम् । यदच्छवदति । अव्ययम् इत्येव, उदकमच्छं [15]गच्छति ॥

## अदोऽनुपदेशे । (७०/७७१)

अदःशब्दस्त्यदादिषु पठ्यते, सोऽनुपदेशे[16] गतिसञ्ज्ञो भवति । उपदेशः परार्थः प्रयोगः[17] । स्वयमेव तु यदा बुद्ध्या परामृशति तदा नास्त्युपदेशः इति सोऽस्य विषयः । अदःकृत्य । अदःकृतम् । यददःकरोति । अनुपदेशे इति किम् ? अदः कृत्वा काण्डं गतः इति [18]परस्य कथयति ॥

## तिरोऽन्तर्धौ । (७१/७७२)

अन्तर्धिः [19]व्यवधानम् । तत्र तिरःशब्दो गतिसञ्ज्ञो भवति । तिरोभूय । तिरोभूतम् । यत्तिरोभवति । अन्तर्धौ इति किम् ? तिरो भूत्वा स्थितः । [20]पार्श्वतो भूत्वा इत्यर्थः ॥

---

1. वर्तमानौ इत्यधिकम् अ. 2. श्रद्धा अभिलाषः, प्रतिघातः उपशमः इत्यधिकम् फ. 3. अभिलाष–निवृत्तिः फ. 4. प्रतिहन्यते ड. फ. ह. 5. अव्ययसञ्ज्ञः फ. 6. काण्डं नास्ति ड. 7. पुराणि कृत्वा गतः इत्यर्थः इत्यधिकम् फ. ह. 8. मकारान्तो नास्ति ह. 9. उदाहरणमिदं नास्ति फ. 10. अस्तंकारं ड, अस्तं कृत्वा गतः क. ड. 11. वाक्यमिदं नास्ति क. 12. च नास्ति ह. 13. अच्छागतम् ब, अच्छंगतः फ. 14. अच्छगच्छति ब. 15. गत्वा अ. 16. गम्ये इत्यधिकम् फ. 17. कथ्यते इत्यधिकम् अ, प्रयोगः नास्ति फ. ह. 18. परामृश्य क. 19. अपवारणं क. 20. वाक्यमिदं नास्ति ब. ड. फ. ह.